संस्कृत-वार्ता:

20.10.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् त्रयाणां सेनानां असाधारणसमन्वयेन सिन्दूराभियानावधौ पाकिस्तानं समर्पणं कर्तुं बाध्यं जातम्।

· प्रधानमन्त्री नरेन्द्रमोदी अद्य गोवा-कारावार-तटयोः आई.एन.एस. विक्रान्तयाने नौसैन्यस्य कर्मचारिभिः सह दीपोत्सवं आचरितवान् । सममेव प्रोक्तवान् यत् आई. एन. एस. विक्रान्तः, आत्म निर्भर भारतस्य, मेड इन इंडिया इत्येतयोः विशालः प्रतीकः अस्ति ।

· अशेषे हि देशे अद्य प्रकाशस्य उत्सवः दीपावली सर्वत्र पारम्परिक-उत्साहेन आचर्यते।

· बिहार-विधानसभा-निर्वाचनस्य द्वितीय-चरणाय नामाङ्कन-पञ्जीकरण- प्रक्रिया अद्य समाप्तिम् एष्यति ।

· वियतनाम-देशस्य हाई-फोंग-नगरे सञ्जातायां एशियाई-नौकायन-प्रतिस्पर्धायां भव्यप्रदर्शनं कुर्वता भारतदलेन त्रीणि स्वर्ण-पदकानि विजितानि।

· आईसीसी-महिला-एकदिवसीय-विश्व-चषक-प्रतिस्पर्धायां अद्य नव-मुंबय्याः डॉ.डी.वाई.पाटिल-स्पोर्ट्स-अकादम्म्यां श्रीलंका-बांग्लादेश दलयो: मध्ये स्पर्धा प्रचलति।

<u>प्रधानमन्त्री नरेन्द्रमोदी- गोवा</u>

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् त्रयाणां सेनानां असाधारणसमन्वयेन सिन्दूराभियानावधौ पाकिस्तानं समर्पणं कर्तुं बाध्यं जातम्। भारतीयसशस्त्रसेनाभिः सह दीपावली उत्सवस्य वार्षिकपरम्परां निर्वहन् प्रधानमन्त्री मोदी अद्य गोवा-कारावार-तटयोः आई एन एस विक्रान्तयाने नौसैन्यस्य कर्मचारिभिः सह दीपोत्सवं आचरितवान्। अस्मिन् अवसरे सः प्रावोचत् यत् भारतस्य प्रथमः स्वदेशीयः विमानवाहकः आई एन एस विक्रान्तः इति भारतस्य सशस्त्रसेनायाः क्षमताम् प्रतिबिम्बयति।

सः अवदत् यत् आई एन एस विक्रान्तः केवलं विमानवाहकः एव नास्ति अपितु एकविंशतितमायाः शताब्द्याः भारतस्य प्रतिभायाः, दृढनिश्चयस्य, वैश्विकप्रभावस्य च प्रमाणम् अस्ति । प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् आई एन एस विक्रान्तः आत्म निर्भर भारतस्य, मेड इन इंडिया इत्येतयोः विशालः प्रतीकः अस्ति । प्रधानमन्त्री सुरक्षाबलानाम् शौर्यस्य , दृढ संकल्पस्य च प्रशंसां विहितवान्। सममेव प्रोक्तवान् यत् अनेन कारणेन देशे माओवादी-आतङ्कवादं समाप्य महत्त्वपूर्णं उपलब्धिं प्राप्तवान् इति । नौसैन्य कर्मचारिणः सम्बोधयन् सः अवदत् यत् सः सौभाग्यशाली अस्ति यत् सः तेषां सह पवित्रोत्सवं आमानयति । सः अवदत् यत् अद्य एकः अद्भुतः दिवसः अस्ति, यत् मम पार्श्वे समुद्रम् अस्ति, अपरतः च भारतस्य वीरसैनिकानाम् बलं अस्ति। सः अवदत् यत् , समुद्रजले सूर्यकिरणानाम् प्रकाशः वीरसैनिकैः प्रकाशिताः दीपावल्याः दीपान् इव विद्यते। ध्येयास्पदं वर्तते यत् प्रधानमन्त्रित्वेन प्रथमवर्षे नरेन्द्र मोदी लद्दाखस्य सियाचिन क्षेत्रे तत्र नियोजितैः सैनिकैः सह दीपावली पर्व आमानितवान्।

<u>दीपोत्सवः</u>

देशे अद्य प्रकाशस्य उत्सवः दीपावली सर्वत्र पारम्परिक-उत्साहेन आचर्यते। अभद्रतायाः उपरि भद्रतायाः प्रतीकः अयं उत्सवः मन्दिरेषु, गृहेषु, अन्यसार्वजनिकस्थानेषु च आचर्यते । अस्मिन् अवसरे जनाः श्रीलक्ष्म्याः पूजनं कुर्वन्ति । देशस्य विभिन्नेषु स्थानेषु नगराणां आपणानि सूत्रैः पुष्पैः च अलङ्कृतानि सन्ति । अद्य राष्ट्रियराजधान्यां दिल्लीनगरे दीपावली पर्वावसरे जनाः स्वदेशीय-वस्तूनां अन्यवस्तूनां च क्रयणं कुर्वन्ति । एतस्मिन् समये दिल्ल्याः आरक्षि बलेन राजधान्यां सुरक्षाव्यवस्था कृता अस्ति। प्रमुख आपणेषु सार्वजनिकस्थानेषु, व्यावसायिककेन्द्रेषु च विशेषसुरक्षोपायाः कृताः सन्ति । दिल्ल्याः आरक्षि बलकर्मिणः केन्द्रीय-सशस्त्र-आरक्षि बलकर्मिणः च नगरे नियोजिताः सन्ति।

अस्मिन अवसरे राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन्, प्रधानमंत्री नरेन्द्र मोदी च दीपावली पर्वावसरे देशवासिभ्यः शुभकामनाः प्रदत्तवन्तः।

## बिहार-निर्वाचनम्

बिहार-विधानसभा-निर्वाचनस्य द्वितीय-चरणाय नामाङ्कन-पञ्जीकरण- प्रक्रिया अद्य समाप्तिम् एष्यति । आहत्य त्रिचत्वारिंशदधिक-द्विशतमासनेषु यत्र विंशति-जनपदानां द्वाविंशत्युत्तरशत-निर्वाचन-क्षेत्रेषु अस्मिन् चरणे नवम्बर-मासस्य एकादश-दिनाङ्के मतदानं भविष्यति। एतावता द्वितीय-चरणाय विभिन्नराजनैतिक-दलैः सह निर्दलीय-प्रत्याशिभिः षट्षष्ट्यधिकैकसहस्र-नामाङ्कन-पत्राणि पूरितानि । अद्य तावत् विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामाङ्कन-प्रत्याहरणस्य अन्तिमा तिथिः अपि अस्ति। अष्टादश-जनपदानां एकविंशत्युत्तरशतं निर्वाचन-क्षेत्रेषु प्रथम-चरणे नवम्बर-मासस्य षष्ठे दिनाङ्के मतदानं भविष्यति। बिहारस्य मुख्य-निर्वाचन-अधिकारिणः कार्यालयात् प्राप्त-सूचनानुसारम्, प्रथम-चरणाय पञ्चसप्तत्यधिकत्रयोदश-शतं नामाङ्कनानि प्रमाणिततया स्वीकृतानि सन्ति।

तेषु सप्तचत्वारिंशदुत्तर-शतं महिला-प्रत्याशिन्यः अष्टचत्वारिंशदुत्तर-द्वादशशतं पुरुष-प्रत्याशिनःच समाविष्टाः सन्ति। प्रत्याहरण-प्रक्रियायाः अनन्तरं प्रथम-चरणे एकविंशत्युत्तरशतं निर्वाचन-क्षेत्राणां कृते निर्वाचन-द्वन्द्वस्य अन्तिमा स्थितिः अपि निर्धारिता भविष्यति ।

## प्रधानमन्त्री नरेन्द्रमोदी - स्वदेशी

प्रधानमन्त्री नरेन्द्रमोदी नागरिकान् स्वदेशीय-उत्पादानाम् क्रयणं कृत्वा चत्वारिंशदधिकैकशतकोटि-भारतीयानां परिश्रमस्य सम्मानं कृत्वा उत्सवं आमानयितुं आहूतवान्। सः नागरिकैः आग्रहं कृतवान् यत् ते स्वदेशीयोत्पादानां क्रयणं कृत्वा सामाजिकमाध्यमेषु अपि प्रेषणं कुर्वन्तु येन अन्यजनाः अपि स्वदेशीय-उत्पादानाम् क्रयणार्थं प्रेरिताः भवेयुः। MyGovindia इत्येतस्मिन् एकं सामाजिकसंदेशमालक्ष्य प्रतिक्रियां दत्त्वा प्रधानमन्त्री मोदी जनान् आहूतवान् यत् ते भारते निर्मितानाम् उत्पादानां क्रयणं कुर्वन्तु । गर्वेण च वदेयुः यत् एतत् स्वदेशी अस्ति। प्रधानमन्त्रिणः एषः पदक्षेपः स्थानीयोद्योगानाम् शिल्पीनां च प्रचारार्थं राष्ट्रव्यापी आन्दोलनस्य , आत्मनिर्भरतायाः, आर्थिकसशक्तिकरणस्य च सन्देशं ददाति।

## अश्विनीवैष्णवः- निरीक्षणम्

रेलमन्त्री अश्विनी-वैष्णवः अद्य नवदिल्ल्यां स्थिते रेलवे-परिषदः परिचालन-कक्षस्य अवलोकनं कृतवान्। अस्मिन् अवसरे सः उत्सवकालावधौ यात्रिणां गमनागमनस्य संज्ञानं स्वीकृतवान् । श्रीवैष्णवः चतुर्विंशति-होरां यावत् कार्यं कुर्वतां कर्मचारिणां मनोबलं वर्धितवान् तथा तेभ्यः दीपावल्याः शुभकामनां अपि दत्तवान्। वर्तमान-उत्सव-कालावधौ भारतीय-

रेलविभागेन यात्रिणां वर्धमानाः याचनाः पूरयितुं व्यापक-प्रबन्धाः कृताः सन्ति । दीपावली-छठ-पर्व्वणां समये सुगम-यात्रां सुनिश्चेतुं रेल-विभागः द्वादश-सहस्राधिकानि विशेष-रेलयानानि प्रचालयति ।

## ऋतु विज्ञान

ऋतु विज्ञान विभागेन केरल, तमिलनाडु, कर्णाटक राज्यानां केषुचित् स्थानेषु अतिवृष्टेः पूर्वानुमानं कृतम् । आगामिदिनद्वये माहे, पुद्दुचेरी, आन्ध्रप्रदेश, लक्षद्वीप , कराईकल चेत्येतेषु क्षेत्रेषु अपि एतादृशी एव स्थितिः भवितुं शक्नोति। ओडिशा, छत्तीसगढ़ झारखंड, कोङ्कण, गोवा, मध्यमहाराष्ट्र, नागालैण्ड, मणिपुर, मिजोरम, त्रिपुरा, तेलङ्गाना, चेत्येतेषां राज्यानां केषुचित् भागेषु वृष्टेः संभावना वर्त्तते ।

## नौकायन-स्पर्धा

भारतीय-नौकायन-दलेन वियतनाम-देशस्य हाई-फोंग-नगरे प्रवर्तितायां एशियाई-नौकायन-प्रतिस्पर्धायां भव्यप्रदर्शनं कुर्वता त्रीणि स्वर्ण-पदकानि, पञ्च रजत-पदकानि तथा द्वे कांस्य-पदके विजित्य आहत्य दशपदकानि स्वायत्तीकृतानि।

## क्रिकेट्

आईसीसी-महिला-एकदिवसीय-विश्व-चषक-प्रतिस्पर्धायां अद्य नव-मुंबय्याः डॉ.डी.वाई.पाटिल-स्पोर्ट्स-अकादम्म्यां श्रीलंका-बांग्लादेश दलयो: मध्ये स्पर्धा प्रचलति। आदौ पणकं विजित्य श्रीलंकादलेन कन्दुक-ताडनस्य निर्णयः कृतः।

।। इति वार्ताः ।।